International Journal of Sanskrit Research 2020; 6(4): 128-132

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2020; 6(4): 128-132
© 2020 IJSR
www.anantaajournal.com
Received: 07-05-2020
Accepted: 09-06-2020

**डॉ. जितेन्द्रकुमार दाश**
संस्कृतविभाग: अभिमन्यु सामन्तसिंहार
उच्चमाध्यमिकविद्यालय:, वालिआ,
याजपुरम्, ओडिशा, भारत

**Corresponding Author:**
**डॉ. जितेन्द्रकुमार दाश**
संस्कृतविभाग: अभिमन्यु सामन्तसिंहार
उच्चमाध्यमिकविद्यालय:, वालिआ,
याजपुरम्, ओडिशा, भारत

# किं ग्राह्या रीति: काव्येषू ?

**डॉ. जितेन्द्रकुमार दाश**

## प्रस्तावना

रसालङ्कारयो रिव रीते: उद्भवस्थानं वेद एव। यत: ऋग्वेदे रीति शब्दस्य व्यवहार: मिलति। तत्र “महीव रीति: सवसा सरत् पृथक्”[१] इति मन्त्रे ‘रीति’ शब्दस्य प्रवाहार्थे व्यवहार:। पुन: “वातेवाजुर्यानद्यवे रीति:”[२] इति मन्त्रे ‘रीङ् गतौ’ धातो: निष्पन्नस्य ‘रीति’ शब्दस्य गमनार्थे प्रयोग: । तथा “तामस्य रीतिपरशोरिव”[३] इति मन्त्रे रीति शब्द: स्वभावार्थक:। काव्यशास्त्रे तु ‘रीति’ शब्दस्यार्थे प्रयुक्ता: पन्था: मार्ग:, प्रस्थानम् इति शब्दा: वेदे प्रयुक्तरीतिशब्दस्यार्थेन सह सम्बन्धिता:। साहित्यशास्त्रे सुवर्णनाभेन प्रथमं रीतितत्त्वस्य निर्णय: कृत इति राजशेखरेणोक्तम्[४] । परन्तु तस्य न कोऽपि ग्रन्थ: अद्याप्युपलब्ध:। अत: काव्यशास्त्रीयरीतितत्त्वस्य मूलं नाट्यशास्त्रस्य प्रवृत्तिरिति स्वीक्रीयते। यथा प्रवृते: विविधदेशै: सह सम्वन्ध: तथा रीतेरपि विविधभूभागै: सह सम्बन्ध:। भामहेन तु देशविशेषै: सह विदर्भादिमार्गाणां सम्बन्ध: नाङ्गीकृत:[५] । वामनेन समर्थितं भामहस्य मतम् गौडीयकवे: वैदर्भीसिद्धत्वात्[६]। रुद्रटेन आनन्दवर्धनेन च पदानां समस्तता अमस्तता च रीते: आधार: अङ्गीकृत:। वामनस्य मतेन पदसंघटनारूपा रीति: रसादीनामुपकारिणी भवति।

“रीतिरात्मा काव्यस्य” इति वदता वामनेन प्रप्रथमं “आत्मा” शब्दस्य प्रयोग: कृत:। रीते: काव्यात्मत्वं चोदघोषितम्। रीतिं परिभाषयता तेनोक्तं यत् “विशिष्टपदरचना रीति:”, “विशेषो गुणात्मा” अर्थात् विशिष्टपदरचना रीतिर्भवति। विशेषो नाम गुणयुक्ततत्वम्। गुणस्तु काव्यशोभाया: संपादक: नित्यधर्म:। अतएव गुणं विना पदावल्या: काव्यत्वं न सम्भवति। यतोऽहि गुणालङ्कारसंस्कृतयो: शब्दार्थयो: काव्यत्वं भवति। केवलं शब्दे अर्थे वा काव्यत्वमौपचारिकं भवति। अतएव गुणविशिष्टपदरचनारुपा रीति: काव्यस्यात्मा भवति। वैदर्भि-गौडी-पाञ्चालीरीतिषु रेखाचित्रमिव काव्यं समाविष्टं भवति। यथा चित्रं केवलं रेखामयं, रेखानां अभावे चित्रस्यास्तित्वं न तिष्ठति तथा काव्ये रीतिमन्तरेण नास्ति अन्यत् किमपि तत्त्वम् । रीत्यभावे काव्यत्वं न सम्भवेत्। अत: सर्वप्रधानत्वात् रीतेरेव काव्यात्मत्वम्। वैदर्भी समस्तगुणयुक्ता इति कृत्वा सर्वग्राहया भवति। वैदर्भ्या एव सामान्यमपि वस्तु आस्वाद्यं भवति। अतएव रीते: काव्यात्मत्वं सिद्धम्। वामनेन काव्ये रीतेरतिरिक्तवस्तुन: अस्तित्वं यद्यपि अङ्गीकृतम् किन्तु तत् वस्तुतत्त्वं रीतिरेव चमत्करोति। अत: वस्तुतत्वात् रीते: महत्वाधिक्यात् काव्यत्मत्वम्।

किञ्च वैदर्भ्यां सामान्योऽप्यर्थ: आह्लादको भवति। वामनस्य मतानुसारं वैदर्भीनिवद्धपदरचनया तुच्छमपि वस्तु अलौकिकं चमत्कारमयमिव प्रतीयते तथा सहृदयानां कर्णगोचरतां गतं सत् तेषां मनसि अमृतवृष्टिरिवाह्लादयति[७]। वैदर्भ्यां काव्यगतं शब्दसौन्दर्यं वर्धेते तथा नीरसं वस्तु सरसं भवति। शब्दवैचित्र्यं नृत्यदिव प्रतिभाति। अतएव काव्यस्य रीति: सर्वोत्कृष्टं तत्त्वमिति निश्चप्रचं वक्तुं शक्यते। यदुक्तं वामनेन-

किन्त्वस्ति काचिदपरैव पदानुपूर्वी
यस्यां न किंचिदपि किंचिदिवावभाति।
आनन्दयत्यथ च कर्ण- पथं प्रयाता
चेत: सताममृतवृष्टिरिव प्रविष्टा।।
वचसि यमधिगम्य स्पन्दते वाचकश्री-
र्वितथमवितथत्वं यत्र वस्त प्रयाति।
उदयति हि तादृक् क्वापि वैदर्भीरीतौ
सहृदय हृदयानां रञ्जक: कोऽपि पाक:।।[८]

वामन: न केवलं रीतिसम्प्रदायस्य संस्थापक:, अपि तु काव्यशास्त्रे रीति शब्दस्य प्रथमलक्षणकर्तृत्वेन परिचित:। यद्यपि तत्पूर्वाचार्याभ्यां भामहदण्दिनां "मार्ग" शब्दस्य प्रयोग: कृत: किन्तु तस्य किमपि लक्षणं न विहितम् । अत: भरतस्य 'प्रवृत्ति:'
मार्गस्य रीतेश्च मूलमिति स्वीक्रियते। पृथीव्यां नानादेशभाषाचाराणां वार्त्तां या प्रकटयति सा प्रवृत्तिरिति भरतमुनेर्मतम्। नाट्यशास्त्रे-

"पृथिव्यां नाना देश-वेश- भाषाचार
वार्त्ता:ख्यापयतीति प्रवृत्ति:।
चतुर्विधा प्रवृतिश्च प्रोक्ता नाट्यप्रयोगत:।
आवन्ती दाक्षिजात्या च पाञ्चाला गौड मागधी[९]।।"

न केवलं भाषाभि: सह प्रवृत्ते: सम्बन्ध: अपितु वेशाचारादिभिश्चेयं सम्बन्धिता। विष्णुधर्मोत्तरपुराणेऽपि प्रवृत्तेरयमर्थ: निर्णितोऽस्ति। तत्र –

आवन्ती दाक्षिणात्या च तथा चैवात्र मागधी।
पाञ्चाली मध्यमा चेति वृत्ति: सातु चतुर्विधा।।
वेषभाषानुकरणं तथा चात्र प्रवर्त्तनम्।
प्रवृत्तिरिति विख्याता वृत्तीनामाश्रयास्तु ता:।।[१०]

आवन्त्याद्या: चतस्र: प्रवृत्तय विकसिता: सत्य: वाणभट्टकाले उदीच्य, प्रतीच्य-दाक्षिणात्य गौडनामभि: शैलीचतुष्टयं चतुर्षु भूभागेषु प्रचलितमासीत्। तत्रे उदीच्ये श्लेषवाहुल्यम्, प्रतीच्ये अर्थगौरवम्, दाक्षिणात्ये उत्प्रेक्षा, गौडे च अक्षराडम्बरं च लभ्यते। वाणभट्टमतेन एतेषां सर्वेषां एकत्र समावेश: दुर्लभोऽपि एतत्सर्वं सत्कवीनामभिप्रेतं भवति। वाणेन यद्यपि 'रीति' शब्दस्य प्रयोग: न कृत: तथापि रीते: आधारभूतयो: गुणालंकारयो: उल्लेख: कृत: दृश्यते। तत्र हर्षचरिते-

श्लेषप्रायमुदीच्येषु प्रतीच्येष्वर्थगौरवम्।
उत्प्रेक्षा दाक्षिणात्येषु गौडेष्वक्षरडम्बर:।।
नवोऽर्थो जातिरग्राम्या श्लेषोऽक्लिष्ट: स्फुटो रस:।
विकाटाक्षरवन्धश्च कृत्स्नमेकत्र दुष्करम्।।[११]

भामहेन वैदर्भगौडमार्गयो: उल्लेख: कृत:। तेन नाममात्रेण वैदर्भस्य श्रेयस्त्वं गौडीयस्य च हीनत्वं नाङ्गीकृतम्। यतो हि सालंकार:, अग्राम्य: अर्थवान्, जटिलादि दोषरहित:, गौडीय: श्रेष्ठ:। वैदर्भस्योक्तगुणरहितत्वान्न श्रेष्ठत्वम्। गुणालंकारौ मार्गस्याधाराविति तेनाम्नातम्। तत्र काव्यालंकारे-

वैदर्भमन्यदस्तीति मन्यन्ते सुधिय: परे।
तदेव च किल ज्याय: सदर्थमपि नापरम्।।
गौडीयमिदमेतत्तु वैदर्भमिति किं पृथक्।
गतानुगतिकन्यायान्नानाख्येयममेधसाम्।।
ननु चाश्मकवंशादि वैदर्भमिति कथ्यते।
कामं तथास्तु प्रायेण संज्ञेच्छातो विधीयते।।
अपुष्टार्थमवक्रोक्ति च प्रसन्नमृजुकोमलम्।
भिन्नं गेयमिवेदन्तु केवलं श्रुतिपेशलम्।।
अलंकारवदग्राम्यमर्थ्यं नाट्यमनाकुलम्।
गौडीयमपि साधोयो वैदर्भमपि नान्यथा।।[१२]

दण्डिन: काव्यशास्त्रीयमार्गनिरुपणं सुव्यवस्थितं भवति। वैदर्भगोडीयमार्गयो: भेद: सुस्पष्टो भवति। तन्मतानुसारं ये श्लेषादिदशगुणा: भरतेन निरुपिता: त एव वैदर्भमार्गस्य प्राणा इति दण्डिन: मतम्। तत्र काव्यादर्शे-

अस्त्यनेको गिरां मार्ग: सूक्ष्मभेद: परस्परम्
तत्र वैदर्भगौडीयौ वर्ण्येते प्रस्फुटान्तरौ।।
इतिमार्गद्वयं भिन्नं तत्स्वरूप- निरुपणात्।[१३]

उद्भटेनानुप्रास प्रसङ्गे परूषा- उपनागरिका-ग्राम्या वृत्तीनामुल्लेख: कृत:[१४]। रूद्रटेन पदानां समस्ततामसमस्ततामाधारीकृत्य रीतिनिरुपणं कुर्वता नवीन: विचार: प्रस्तुत:। तन्मतानुसारं वैदर्भी समासरहिता भवति। द्वित्रिसमस्तपदा पाञ्चाली तथा पञ्चसप्तवा समस्तपदा लाटीया दीर्घसमासवती गौडीया भवति। काव्यालंकारे-

वृत्ते: समासवत्यास्तत्र स्यु रीतयस्तिस्र:।
पाञ्चाली लाटीया गौडीया चेति नामतोऽभिहिता:।
लघुमध्यायतविरचनसमासभेदादिमास्तत्र।

द्वित्रिपदा पाञ्चाली लाटीया पञ्च सप्त वा यावत्।।
शब्दा: समासवन्तो भवति यथाशक्ति गौडीया[१५] ।
रसविशेषेण सह रीतिविशेषस्य सम्बन्धं प्रदर्शयता रुद्रटेन एका नवीनसरणी उद्भाविता। तत्र–

इह वैदर्भी रीति: पाञ्चाली वा विचार्य रचनीया
मधुरललिते कविना कार्ये वृत्ती तु शृङ्गारे।।
वैदर्भी पाञ्चाल्यौ प्रेयसि करुणे भयानकाद्भूतयो:
लाटीयागौडीये रौद्रे कुर्याद् यथौचित्यम्।।

अग्निपुराणे चतस्र: रीतय: निरुपिता सन्ति[१६]। आनन्दवर्धनेन संघटना शब्देन रीतितत्त्वस्यालोचना कृता। पदानां रसानुकूलरचना संघटना भवति। माधुर्यादिगुणाश्रिता रसान् अभिव्यञ्जयन्ती संघटना असमासा, मध्यमसमासा, दीर्घसमासा रूपेण त्रिविधा। ध्वन्यालोके-

गुणानाश्रित्य तिष्ठन्ती माधुर्यादीन्व्यनक्ति सा।
रसान् तन्नियमे हेतुरौचित्यं वक्तृवाचयो:।।
असमासा समासेन मध्यमेन च भूषिता।
तथा दीर्घसमासेति त्रिधा सङ्घटनोदिता[१७]।।

आनन्दवर्धनस्य मतानुसारं न रीतिगुणयो: अभेदत्वम् न च रीते: गुणाधारत्त्वम। रीति: गुणाश्रिता, तस्याश्चाधार: गुण एव। समस्तैरसमस्तैश्च पदै: गुणाश्रिता रीति: संघटना वा रसमभिव्यनक्ति । रीति: रसाभिव्यक्तौ साधनमिति कृत्वा स्वत: न सिद्धयति परन्तु वामनस्य मतेन रीति: स्वत: सिद्धा इति तस्या: आत्मत्वं सम्भवति। औचित्यमेव रीते: नियामकमिति तस्याशय:।

रसान् तन्नियमे हेतुरौचित्यं वक्तृवाच्ययो:।।
विषयाश्रयमप्यन्यदौचित्यं तां नियच्छति।
काव्यप्रभेदाश्रयत: स्थिता भेदवती हि सा।।
रसबन्धोक्तमौचित्यं भाति सर्वत्रसंश्रिता।
रचना विषयापेक्षं तत्तु किंचिद्विभेदवत्।।[१८]

वचनविन्यासक्रम: रीतिरिति निगदता राजशेखरेण पदानां समस्ततासमस्तताधारेण रीतीनां विचार:कृत:। तेन गौडी, पाञ्चाली, वैदर्भी, चेति तिस्र: रीतय: यद्यपि निरुपिता: काव्यमीमांसायां[१९] किन्तु कर्पूरमञ्जर्यां मागधी रीते: चर्चा कृता लक्ष्यते[२०]। मार्गशब्देन रीतितत्त्वस्यालोचनं कुर्वता कुन्तकेन मार्ग त्रयम् आम्नातम्। कोमलासममस्तपदविन्यस्ते सुकुमारमार्गे माधुर्य-प्रसाद-लावण्य-आभिजात्यानामसाधारणगुणानां तथा औचित्य सौभाग्ययो: साधारणगुणयो: समावेशो भवति। वक्रोक्तिवैचित्र्यं द्वितीयमार्गस्य जीवनं भवति। मध्यममार्गे वैचित्र्येण सौकुमार्येण च कृत्रिमं सहजं च वैचित्र्यं लभ्यते। तन्मतानु सारं देशानामाधारेण रीतीनां नामकरणमनुचितम्। अपितु कविस्वभावाधारेण मार्गाणां वैचित्र्यमिष्टं भवति। वक्रोक्तिजीविते –

सम्प्रति तत्र ये मार्गा: कविप्रस्थानहेतव:।
सुकुमारो विचित्रश्च मध्यमश्चोभयात्मक:।। [२१]

महिमभट्टस्य मतेन पदार्थानामुक्तर्षतामपकर्षतां च विना रससमुत्पादकत्वम-सम्भवम्। अलंकारैरेव पदार्थानामुत्कर्षता जायते अभावे च अपकर्षता जायते। उत्कर्षतायामपकर्षतायां च प्रधानभावस्य विवक्षा एव मुख्यं कारणं भवति। प्रधानेतरभावस्य विविक्षा समस्तपदेषु न तिष्ठति समासस्य पदार्थसम्बन्धमात्रप्रकाशनात् नोत्कर्षापकर्षयो: प्रकाशनात् च। वैदर्भ्यां सर्वथासमासाभावात् सैव प्रशस्ता रीतिर्भवति। आचार्यस्य भाषायाम्-

विनोत्कर्षापकर्षाभ्यां स्वदन्तेऽर्था न जातुचित्।
तदर्थमेव कवयोऽलंकारान् पर्युपासते।
तौ विधेयानुवाद्यत्वविवक्षैकनिवन्धनौ।
सा समासेऽस्तमायातीत्यसकृत् प्रतिपादितम्।।
अत एव च वैदर्भी रीतिरेकैव शस्यते।
यत: समाससंस्पर्शस्तत्र नैवोपपद्यते।।
सम्बन्धमात्रमर्थानां समासोक्त्यावबोधयेत्।
नोत्कर्षमपकर्षं वा...................।। [२२]

भोजराजेन रीतिप्रसङ्गे पन्था-मार्ग-रीतिशब्दानां व्यवहार: कृत:। तेन विदर्भादिदेशीयकविनिर्दिष्ट: पथ एव काव्ये मार्ग इत्युच्यते। रीङ्गतौ धातो: रीयन्ते अनया इति व्युत्पत्या रीतिरूच्यते। आवन्तिका इति नूतनां रीतिमुदभाव्य तेन षडरीतय: आम्नाता:। गुणानां समासस्यचाधारेण रीते: स्वरूपं निर्णितम्। तत्र पाञ्चालीवैधर्भ्यो: अन्तरालवर्तिनी भवति आवन्तिका। सर्वासां रीतीनां संमिश्रणेन लोटी भवति।।

वैदर्भीकृत: पन्था काव्ये माार्ग इति स्मृत:।
रीङ्गताविति धातो: सा व्युत्पत्या रीतिरुच्यते।।
वैदर्भी साथ पाञ्चाली गौडीयावन्तिका तथा।
लाटीया मागधी चेति षोढा रीतिर्निगद्यते।
तत्रासमासा नि:शेषश्लेषादिगुणगुम्फिता।
विपञ्चीस्वरसौभाग्या वैदर्भी रीतिरिष्यते।।
समस्तपञ्चषपदामोज: कान्तिविवर्जिताम्।
मधुरां सुकुमारांच पाञ्चालीं कवयो विदु:।।
समस्तात्युभटपदामोज: कान्तिगुणान्विताम्।
गौडीयेति विजानन्ति रीतिं रीति विचक्षणा:।। [२३]

आचार्यमम्मटेन माधुर्याभिव्यञ्जकवर्णै: उपनागरिका ओजप्रकाशकै: वर्णै: परुषा, प्रसादप्रत्यायकवर्णै: कोमला इति तिस्र: वृत्तयरुक्ता:। एता: वृत्तय: क्रमेण वैदर्भी-गौडी-पाञ्चालीति तिस्र: रीतय: भवन्ति[२४]। रुय्यकेन गुणस्य संघटनाधर्मत्वमुक्तम्[२५]। प्रथमवाग्भटेन रुद्रट:, हेमचन्द्रेण च मम्मट: रीतिप्रसङ्गे अनुसृत: । तत्र वाग्भटालंकारे-

“द्वे एव रीती गौडीया वैदर्भी चेति सान्तरे।
एका भूय:समासा स्यादसमस्तपदाऽपरा”।।[२६]

काव्यानुशासने -
“माधुर्योज:प्रसादव्यञ्जकाश्च वर्णा: उपनागरिका परुषा कोमळा च वृत्तिराचक्षते”।[२७]
शारदातनयेनास्मिन् प्रसङ्गे राजशेखरमतमनुसृतम्। देशविशेषेण सह रीतिविशेषस्य सम्बन्धमङ्गीकुर्वता तेन रीति चतुष्टयमुक्तमपि सौराष्ट्री द्राविडीति रीतिद्वयमंगीकृतम्[२८]। आचार्येणामृतानन्दयोगिना रीते: आत्मत्वमुद्घोषयता रूद्रट-वामन-मम्मट- मताधारेण रीतीनां स्वरूपं निर्णितम्। तन्मतासारं वेदर्भ्यां श्लेषादय: दशगुणा: माधुर्यादिगुणानामभिव्यञ्जका वर्णा: तथा अल्पसमस्तपदानि स्यु:। गौड्यां समस्तपदानि, ओज: कान्तिरितिगुणद्वयं तथा महाप्राणाक्षराणि स्यु:। पाञ्चाल्यां माधुर्य-सौकुमार्य-ओज-कान्त्यादय: गुणा: स्यु:। लाट्यां अल्पसमास: संयुक्तवर्णाना माधिक्यं तथा धोषाक्षरणां स्वल्पत्वं प्रतितिष्ठन्ति। अलंकारसंग्रहे-

रीति रात्मात्र काव्यस्य कथ्यते सा चतुर्विधा।
एतै: समग्रा वैदर्भी वर्ण्यते दशभिर्गुणै:।। [२९]
असमस्ता द्वित्रिपदसमस्ता वा मनोहरा।
वर्गद्वितीय-प्रचुरा स्वल्पघोषाक्षरा यथा।।
समस्तात्युद्भटपदामोज: कान्ति समन्विताम्
महाप्राणाक्षरवतीं गौडीमाहुर्बुधा यथा।।
माधूर्यसौकुमार्योज: कान्तिभि: सहिता गुणै:
समस्तपञ्चषपदा पाञ्चाली कीर्त्यते यथा।
समस्तरीतिसंमिश्रा लाटी मृदु समासिनी
संयुक्तवर्णभूमिष्ठा स्वल्पघोषाक्षरा यथा।[३०]

जयदेवस्य रीतिविचारे रुद्रटस्य छाया परिलक्ष्यते। चन्द्रालोके-
आचतुष्टयमासप्त यथेष्टैरष्टमादिभि:

समास: स्यात् पदैर्नस्यात समास: सर्वथापि य:।
पाञ्चाली किञ्च लाटीया गौडीया च यथा रसम्।
वैदर्भी च यथासंख्यं चतस्रो रीतय: स्मृता:।। [३१]

विद्याधरेण वामनमताधारेण रीतिनिर्णय: कृत:। तन्मतानुसारं वैदर्भी-गौडी-पाञ्चालीरीतीनां सांकर्येण आवन्तिका -लाटीया-मागधीरीतय: भवन्ति। शिङ्गभूपालस्य रीतिविचारे काव्यमीमांसाया: प्रभाव: लक्ष्यते। तन्मतानुसारं कोमला-कठिना-मिश्रा चेति रीते: त्रयो भेदा: भवन्ति। तत्र कोमलायां महाप्राणवर्णानां स्वल्पता, अल्प प्राणवर्णानां च बहुलता तथा श्लेषादिगुणा: भवन्ति। इयं समासरहिताल्पसमासयुक्ता वा भवति। तथा-
विदर्भजनानां हृद्यत्वादियं वैदर्भी उच्यते। कठिनायां दीर्घसमासा: महाप्राणवर्णा: स्यु:। गौडकवीनामिष्टत्वादियं गौडी निगद्यते। मिश्रायां कोमल-कठिनगुणा: सन्तिवेशिता भवन्ति। इयं च पाञ्चालीति उच्यते। रसार्णवसुधाकरे-

बुद्धयारम्भास्तथा प्रोक्ता रीतिवृत्तिप्रवृत्तय:।
रीति: स्यात् पदविन्यासभङ्गी सा तु त्रिधा मता।।
कोमला-कठिना मिश्रा चेति स्यात् तत्र कोमला
द्वितीयतुर्यवर्णैर्या स्वल्पैर्वर्गेषु निर्मिता।
अल्पप्राणाक्षरप्राया दश प्राणसमन्विता।

समासरहिता स्वल्पैः समासैर्वाविभूषिता।
विदर्भजनहृद्यत्वात् सा वैदर्भीति कथ्यते।।
अतिदीर्घसमासयुता वहुलैर्वर्णैर्यूता महाप्राणैः।
कठिना सा गौडीयेत्युक्ता तद्देशवुधमनोज्ञत्वात्।
यत्रोभयगुणग्रामसन्निवेशस्तुलाधृतः।
सा मिश्रा सैव पाञ्चालीत्युक्ता तद्देशजप्रिया।।[३३]

गुणयुक्तपदसंघटना रीतिरिति विद्यानाथस्य मतम्। स्वभावस्यात्मोत्कर्षधायकत्वमिव रीतेः रसोत्कर्षधायकत्वमिति विद्यानाथः निगदति। वामनोक्तास्तिस्र रीतयः तस्याभिप्रेता भवन्ति। विद्यानाथस्य भाषायाम्-

रीतिर्नामगुणाश्लिष्टपदसंघटना मता
आत्मोत्कर्षावहास्तत्र स्वभावा इव रीतयः।
बन्धपारुष्यरहिता शब्दकाठिन्यवर्जिता
नातिदीर्घसमासा च वैदर्भी रीतिरिष्यते।।
ओजः कान्तिगूणोपेता गौडीया रीतिरिष्यते
पाञ्चाली रीति वैदर्भी गौडी रित्युभयात्मिका।[३४]

द्वितीय वाग्भट्टेन वामन-रुद्रट-मम्मटमतमनुसरता रीतिविचारः प्रस्तुतः।[३५] विश्वनाथस्य मतानुसारं यथा अङ्गानां समुचितविन्यासः सौन्दर्याधायको भवति तथा आत्मन उपकारको भवति तथा पदसंघटना रूपा रीतिः काव्यसौन्दर्यं वर्धयति तथात्मभूतं रसमुपकरोति। मम्मटमतमाधारीकृत्य विश्वनाथेन माधुर्यादिगुणाभिव्यञ्जकवर्णैः पदानां समस्ततासमस्तताधारेण वैदर्भ्याद्याः च तिस्रः रीतयः आम्नाताः[३६]। केशवमिश्रेणालंकारशेखरे गाड़ी-वैदर्भी-मागधीनामुल्लेखः कृतः। तत्र रीतेः काव्यजीवितत्वं निगदितमस्ति। तत्रालंकारशेखरे-

तत्तद्रसोपकारिण्यस्ततददेश समुदभवाः।
पद्येषु रीतयो गौडी वैदर्भी मागधी तथा।।
रीतिरुक्तिस्तथा मुद्रा वृत्तिः काव्यस्य जीवितम्।
गौडी समास भूयस्त्वाद् वैदर्भी च तदल्पतः।
अनयोः संकरो यस्तु मागधी सातिविस्तरा।।
गौडीयाः प्रथमा मध्या वैदर्भे मैथिलैस्तथा।
अन्यैश्त चरमा रीतिः स्वभावादेव सेव्यते।।[३७]

पण्डितराज जगन्नाथेन रीतिवृत्तयोरभेदः परिकल्पितः। केवलं वैदर्भ्याः स्वरूपं निरुपयता तेनोक्तं यत् - रचनाविशेषा वैदर्भी सर्वथा सामान्यदोषैः विशेषदोषैश्च रहिता भवति। माधुर्यादिगुणयुक्ता भवति।

"एभि र्विशेषविषयै सामान्यैरपि च दूषणै रहिता
माधुर्यभारभङ्गुरसून्दर पदवर्णविन्यासा।।"
व्युत्पत्तिमुदगिरन्ती निर्मातुर्या प्रसादयूता।
तां विवुधा वैदर्भी वदन्ति वृत्तिं गृहीतपरिपाकाम्।।[३८]

साहित्यसार ग्रन्थस्य प्रणेता अच्युतरायः पूर्वाचार्याणां मतमनुसरन् रसोपकारिणीं पदसंघटनां रीतिं मनुते तथा वैदर्भ्यादिरीतित्रयमङ्गीकरोति।[३९]
अनयालोचनया ज्ञायते यत् रीतेः आत्मत्वमङ्गीकृतं वामनामृतानन्दादिभिः कैश्चिदाचार्यैः। यद्यपि वामनात् प्राचीनैः अर्वाचीनैश्चाचार्यैः रीतेः आत्मत्वमनङ्गीकृतम् तथापि काव्येषु तस्याः महत्वं समधिकम्। राजशेखरस्य मतेन वैदर्भी श्रोत्रपेयं माधुर्यं सृजति। वामनस्य मतेन वैदर्भिद्वारैव काव्ये शब्दसौन्दर्यं तथा चमत्कृतं भवति येन निःसारमपि वस्तु ससारं भवति।

अतएव वामनात् पूर्व रीति शब्दः काव्यमार्गार्थे प्रचलित आसीत् तथा वामनात् परंतदर्थे अपि रीतिशब्दस्य व्यवहारः जातः । रीतेरात्मत्वं स्वीकुर्वतां साहित्यशास्त्रिणां संख्या नगण्या । रीतेः आधारतत्त्वमपि परिवर्त्तितम्। काव्यस्य जीवनधायिका आत्मरूपा च वामनस्य रीतिः परिवर्त्तिनिकाले अवयवसंस्थानमिव काव्यात्मभूतरसतत्त्वमासीत्। रसतत्त्वेन सह वामनः परिचितः आसीत् । किन्तु रसतत्त्वस्य महत्वं तेन नाङ्गीकृतम् वामनस्य मतानुसारं काव्ये विशिष्टपदरचना गुरुत्वपूर्णा भवति। काव्ये रीतेः अंगित्वं रसस्य चाङ्गत्वम्।
किंच गुणमयी पदरचना रीतिर्भवति। रीतौ गुण एव प्रधानः तथा अनिवार्यः। स एव काव्यत्वस्य सम्पादकः नित्यधर्मः। गुणातिशयस्य कारणत्वात् अलंकारः रीतौ नानिवार्यः परन्तु उत्कर्षकः। रीतिः अंगी अलंकारश्चङ्गम। रीतिः काव्यस्यान्तस्तत्वम्। अलङ्कारश्च वाह्यतत्त्वम्। शब्दार्थरूप काव्यशरीरस्यात्मरूपायाः रीतेः उत्कर्षकाः अलंकारा भवन्ति।

**सहायकग्रन्थाः**


१. ऋग्वेदः - १/२८/१४।
२. ऋग्वेदः - २/३९/५।
३. ऋग्वेदः- ५/४४/४।
४. रीतिनिर्णयं सुवर्णनाभः। काव्यमीमांसा- पृ ३।
५. काव्यात्ममीमांसा –पृ.१५१।
६. विदर्भादिषु दृष्टत्वात् तत् समाख्या
७. न पुनर्देशैः किंचिदुपक्रियते काव्यानाम्। काव्यालंकारसूत्रवृत्तिः - १/२/११।
८. काव्यालंकारसूत्रवृत्तिः- १/२/२१।
९. काव्यालंकारसूत्रवृत्तिः -१/२/२२।
१०. नाट्यशास्त्रम् १४/३६।
११. विष्णुधर्मोत्तर पुराणम्- तृतीय खण्डम्-२०/५९।
१२. हर्षचरितम् -८,९।
१३. काव्यालङ्कारः (भामहः) १/३१-३५।
१४. काव्यादर्शः १/४०।
१५. शषाभ्यां रेफ संयोगैष्टवर्गेण च योजिता।
१६. परुषा नाम वृत्तिः स्याद्...........।। काव्यालंकारसंग्रहः ४-६।
१७. काव्यालंकारः (रुद्रटः) -२/२३,५०।
१८. वाग्विद्यासम्प्रतिज्ञाने रीतिः सापि चतुर्विधा।
१९. पाञ्चाली गौडदेशीया वैदर्भी लाटजा तथा। अग्निपुराणम्-३४०/१।
२०. ध्वन्यालोकः ३/६।
२१. ध्वन्यालोकः -३/६,७,९।
२२. वचनविन्यासक्रमो रीतिः। काव्यमीमांसा – पृ-२१।
२३. कर्पूरमञ्जरी- प्रस्तावनायाम्।
२४. वक्रोक्तिजीवितम्-१/२४।
२५. व्यक्तिविवेकः -२/१४-१७।
२६. सरस्वतीकण्ठाभरणम् -२/५१-५५।।
२७. माधुर्यव्यञ्जकैर्वर्णैरुपनागरिकोच्यते।
२८. ओजः प्रकाशकैस्तैस्तु परूषा कोमला परैः।
२९. केषांचिदेता वैदर्भिप्रमुखा रीतयो मताः।। काव्यप्रकाशः ८/१।
३०. अलंकारसर्वस्वम् –पृ.७।
३१. वाग्भटालंकारः - ४-१४९।
३२. काव्यानुशासनम्-अ.४।
३३. वुद्ध्यारम्भानुभावेषु रीतिः प्रथममुच्यते।
३४. रीतिर्वचनविन्यासक्रमः सापि चतुर्विधा।।
३५. तत्र वैदर्भपाञ्चाललाटगौडविभागतः।। भावप्रकाशः-पृ.११।

३६. अलंकारसंग्रहः ५/१।
३७. अलंकारसंग्रहः -५/९-१२।
३८. चन्द्रालोकः -६/२१-२२।
३९. एकावली -५/९-१३।
४०. रसार्णवसुधाकरः-१/२२७,२२८।
४१. प्रतापरुद्रीयम् – काव्यप्रकरणम्-२७।
४२. काव्यानुशासनम् -२ /पृ.३१।
४३. साहित्यदर्पणः - ९/१।
४४. अलंकारशेखरः - १/२/२।
४५. रसगंगाधरः - पृ-११७।
४६. साहित्यसारः -७१३६।